International Journal of Applied Research 2018; 4(1): 396-398



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2018; 4(1): 396-398
www.allresearchjournal.com
Received: 22-11-2017
Accepted: 26-12-2017

**डॉ. कमलेश कमल**
पूर्व गवेषक, संस्कृत–विभाग,
पटना विश्वविद्यालय, पटना,
बिहार, भारत

**Corresponding Author:**
**डॉ. कमलेश कमल**
पूर्व गवेषक, संस्कृत–विभाग,
पटना विश्वविद्यालय, पटना,
बिहार, भारत

# वैदिकसाहित्ये अथर्ववेदस्य स्थानं महत्वं च

**डॉ. कमलेश कमल**

**प्रस्तावना**

वैदिकसाहित्यं तोयनिधिरिव सुविस्तृतं सुविशालं गहनतरं च वर्तते इति सुविदितमेव विदुषाम्। तत्र चत्वारो वेदाः, उपवेदाः, ब्राह्मणग्रन्थाः, आरण्यकग्रन्थाः, सूत्रग्रन्थाः, तथैवोपनिषद्ग्रन्थाः सुप्रथिताः सन्ति। सम्पूर्णेऽपि वैदिकवाङ्मये चतसृणाम् ऋग्यजुः सामाथर्वरूपाणां वेदसंहितानां सर्वाधिकं महत्त्वं वरीवर्ति। वेदाः न खलु आर्याणां भारतीयानां वा प्रत्युत समग्रायाः खलु मानवजातेः प्राचीनतमाः कल्याणग्रन्थास्सन्ति। वेदानांसर्वज्ञानकल्याणमयत्वं मत्वैव ऋषिभिः तत्कृते ईश्वरीयं ज्ञानमिति नाम प्रदत्तम्। अत एव वेदानाम् अपौरुषेयत्वमपि भारतीयैः विद्वद्भिः निर्विवादमेव स्वीकृतम्। यद्यपि सन्ति केचन् एवंविधा अपि विद्वांसः ये खलु वेदानाम् अपौरुषेयत्वस्वीकरणे संकोचमाकलयन्ति, परं तथाऽपि इदं तु सर्वजनाभिमतम् अस्त्येव यद् वेदाः विश्वपुस्तकालये प्राचीनतमाः ग्रन्थास्सन्ति। भारतीये सांस्कृतिके इतिहासे वेदानां महत्त्वं सर्वथैव अनपहेयम्। वेदज्ञानं विना मानवसृष्टेः महत्त्वम् अपूर्णमव प्रतिभाति।

वेदज्ञानम् एकरूपमेव, परन्तु मनीषिभिः स्वरूपभेदेन त्रिधा प्रकल्पितम्। येषु मन्त्रेषु अर्थवशात् पादव्यवस्था ते मन्त्राः ऋग्नाम्ना व्यपदेश्याः [1]। ये मन्त्राः गीतिरूपाः ते सामनाम्ना वाच्याः [2]। अवशिष्टास्तु मन्त्राः यजुर्नाम्ना अभिधीयन्ते [3]। एवमेव वेदज्ञानं विषयभेदेनत्रिधा निगद्यते–ज्ञानकाण्डम, उपासनाकाण्डम्, कर्मकाण्डम् च। त्रिष्वेषु प्रकारेषु चतुर्णामपि वेदानां तथैव समावेशो भवति यथा 'पृथिव्यन्तरिक्षयुलोकेषु समग्रस्य सौरजगतः।' सर्वानुक्रमणीकारः लिखति– ''विनियोक्तव्यरूपश्च त्रिविधः सम्प्रदर्श्यते। ऋग्यजुः सामरूपेण मन्त्रो वेदचतुष्टये।'' तथैव शतपथब्राह्मणमपि चतुर्णामपि वेदानामीश्वरोक्तत्वं प्रतिपादयति–

**एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद् यद् –**
**ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाऽङ्गिरसः – इति।** [4]

गोपथब्राह्मणग्रन्थे [5], मुण्डकोपनिषदि [6], नृसिंहपूर्वतापिन्युपिनिषदि [7] चापि चतुर्णाम् वेदानां नाम पठ्यते। ऋग्वेदस्य अथर्ववेदस्य च एते ऋचौ चतुर्वेदानां परमेश्वरोक्तत्वं निरूपयतः–

**तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे।**
**छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।** [8]
**यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।**
**सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्।।** [9]

चतसृणाम् वेदसंहितानाम् भूयसी विशिष्टता वर्तते। ऋग्वेदे यजुर्वेद सामवेदे च आमुष्मिकफलप्रदातारौ मन्त्राः सन्ति इति निगद्यते, यतो हि अत्र लौकिकाभ्युदयस्य प्राप्तिरेव विशेषरूपेण वर्णिता, परम्. अथर्ववेदस्तु ऐहिकामुष्मिक फलप्रदोऽप्यस्ति [10]। जीवनं सुखयितुम् यान्यपि साधनानि अपेक्षितानि सन्ति, यानि च अनुष्ठानानि मानवजीवनं सुखयितुमर्हन्ति, तान्येवाविकलतया अथर्ववेदे वर्णितानि सन्ति। आचार्यसायणेन अथर्ववेदस्योपोद्घाते अथर्ववेदीयानां बहुविधविद्यानां प्रतिपादनं कृतम्। [11] तत्रैव अथर्वपरिशिष्टस्य उल्लेखः कृतः, तत्र कथितं यत् यस्मिन् राष्ट्रे अथर्ववेदस्य ज्ञाता निवसति तद्राष्ट्रम् उपद्रवरहितं भवति वृद्धिञ्चावाप्नोति। [12] अपि च सः जनः प्राप्तसर्वसिद्धिको जायते। [13] सायणाचार्येण स्कान्दकमलालयखण्डानुसारम् आथर्वणमन्त्राणां जयमात्रेणाऽभिमत– फलसाधनत्वमुक्तम्। [14] सायणानुसारं ब्रह्मकर्त्तव्यप्रतिपादकस्य अथर्ववेदस्य ज्ञानाभावे यज्ञीयशरीरोद्भव एव न भवति। [15] अथर्ववेदे नानाविद्यावत्त्वं विविधविषयात्मकता च दरीदृश्यते। ताण्ड्यमहाब्राह्मणकारमते अत्र औषधविद्याऽपि वेशद्येन वर्णिता अत एव अथर्ववेदः ''भैषज्यवेद'' नाम्नाऽपि अभिधीयते। [16]

वैदिकसाहित्ये अथर्ववेदस्य कृते अनेकविधानि नामानि दृश्यन्ते, यथा– अङ्गिरोवेदः [17], अथर्वाङ्गिरसो वेदः [18], भृग्वङ्गिरसां वेदः [19], क्षत्रवेदः [20], भैषज्यवेदः [21], ब्रह्मवेदः [22], छन्दोवेदः [23] इति। एतानि सर्वाण्यपि नामानि अथर्ववेदस्य महिमानमेव उद्गिरन्ति। ब्राह्मणकारस्तु सर्वान् वेदान् चतुर्धा ददर्श यथा– ''ऋग्वेदेन होता करोति, यजुर्वेदेनाध्वर्युः सामवेदेनोद्गाता अथर्वा बृह्मा इति।

अयं विभागः नास्ति काल्पनिकः, अपितु ऋग्वेदादप्यस्य परिपुष्टिर्भवति –

**ऋचां त्वः पोषमास्ते पुपुष्वान्, गायत्रं त्वो गायति शक्वरीषु।**
**बृह्मा त्वो वदति जातविद्यां, यज्ञस्य मात्रां विमिमीत उ त्वः।। [24]**

मन्त्रमिमं यास्काचार्य एवं व्याकरोति निरुक्तशास्त्रे–

''ऋचामेकः पोषमास्ते पुपुष्वान् होता। गायत्रमेको गायति शक्वरीषु उद्गाता। [25] ब्रह्मको जाते जाते विद्यां वदति। [26] ब्रह्मा सर्वविद्यः सर्व वेदितुमर्हति। ब्रह्मा परिवृड्हः श्रुततः ब्रह्म परिवृड्हं सर्वतः। यज्ञस्य मात्रां विमिमीत एकः अध्वर्युः। [27]

निरुक्तकारेण ब्रह्मशब्दस्य निर्वचने ''सर्वविद्यः'' इति शब्दः प्रयुक्तः। [28] एतेनैव प्रतीयते यद् होतुः, उद्गातुः, अध्वर्योश्चापेक्षया ब्रह्मणः ज्ञानं परिवृद्धं भवति। गोपथब्राह्मण– कारेणापि ब्रह्मणः महत्त्वम् एवं प्रकटितम् –

**''अथर्वाङ्गिरोभिर्ब्रह्मत्वम्। अथर्वाङ्गिरोवित् ब्रह्माणम्'' इति।**

अत्रापि अयमेवाभिप्रायो विद्यते यद् यज्ञे ब्रह्मणः नियुक्तिः अथर्ववेदवेत्तृत्वादेव भवति। छान्दोग्योपनिषदि [29] ऐतरेयब्राह्मणग्रन्थे च [30] यज्ञकर्मणि ब्रह्मा भिषक्पदवीविभूषितः। ब्रह्मा यज्ञकर्मोद्भवान् दोषान् स्वकीयाथर्ववेदज्ञानबलेनैव निराकरोति।

यज्ञप्रक्रिया भागद्वये विभक्ता। प्रथमा प्रक्रिया वाचिकी या होत्रुद्गात्रध्वर्युनाम– कैस्त्रिभित्रत्विग्भिः सम्पाद्यते। अपरा क्रिया मानसिकी या मानसिक्या शक्तया सम्पाद्यते। इमामपरां क्रियां यज्ञाध्यक्षो ब्रह्मा सम्पादयति। [31] ऐतरेयब्राह्मणे बृह्मणः महत्त्वं प्रायशः प्रतिपाद्यते। तत्र च ऋत्विक्कर्मप्रसंगे ब्रह्मणः कर्म प्रशस्यतरं कथितम्। [32] गोपथब्राह्मणेऽपि ब्रह्मणः प्रशंसा विलोक्यते। [33] यद्यपि ब्रह्मा अथर्व वेदातिरिक्तं वेदत्रयस्यापि ज्ञाता भवति, परं तस्य अथर्ववेदीयं ज्ञानं तु अखण्डतया निश्चितम्। अयं ब्रह्मा सारग्राहित्वात् ब्रह्मकर्तव्यकारित्वात् ब्रह्मरूपत्वाच्च ब्रह्मा भवति। अत एवाथर्ववेदो ब्रह्मवेदनाम्ना विभूषितः। [34]

केचन समालोचकारू ऋग्वेदस्य प्राचीनत्वम् अवशिष्टानां त्रयाणां वेदानां च अर्वाचीनत्वं मन्यन्ते। केचन तु अथर्ववेदस्य परिशिष्टमात्रत्वमाहुः। पाश्चात्यसमालोचकाः तु अथर्ववेदस्य वेदत्वविषयेऽपि सन्देहं कुर्वन्ति। यतो हि सामान्यरूपेण ''वेदत्रयी'' शब्दः वेदविषये व्यवह्रियते। केचन कथयन्ति यत् 'त्रयी' इत्यनेन ऋक्, यजुः, साम, इत्येतेषामेव बोधो भवति। 'ऐतरेयब्राह्मणम्' [35], शतपथब्राह्मणम् [36], बृहदारण्यकोपनिषद् [37], मनुस्मृतिः [38] इत्यादिषु ग्रन्थेषु 'त्रयी' शब्द एव उल्लिखितो दृश्यते। अनेन सन्देहो जायते यत् पुरा 'वेदाः' ऋग्, यजुः, साम इति त्रयः एव आसन्। तथा च अथर्ववेदः कालान्तरे निबद्धोऽस्ति।

ऋग्वेदसंहितायाः 1200 मन्त्राः अथर्ववेदे प्रथमाष्टमदशमकाण्डेषु अपि उपलभ्यन्ते। विंशम् काण्डम् तु ऋग्वेदमन्त्राणाम् आकर एव दृश्यते। [39]

पुराणग्रन्थेष्वपि स्पष्टरूपेण अथर्वविषये कोऽप्युल्लेखो न प्राप्यते। त्रेतायां यदा संहिता नां निर्माणमभवत् तदा प्रारम्भे कियत्यः संहिताः आसन् इत्यस्य उल्लेखः पुराणेषु स्पष्टतया न दृश्यते। सम्भाव्यते यत् ऋग् – आदि त्रिवेदसंहितानां प्रवचनम् एकस्यामेव परम्परायामभवत्। अथर्वसंहितायाः प्रणयन् च यज्ञमयश्रीतपरम्परां परित्यज्य लौकिकपरम्परायां दृश्यते, अत एव ऋग्–यजुः–साम वेदसंहिताप्रणयनप्रसंगे अथर्ववेदस्योल्लेखो न क्रियते। श्रौतयाज्ञिकदृष्ट्या अथर्ववेदस्य स्थानम् अत्यन्तसामान्यरूपेण आसीत्। अत एव पुराकालत एव अथर्ववेदस्य 'वेदत्व' विषये विवादः प्रचलितः। [40] अथर्ववेदस्य लौकिकत्वाद् एव वेदोऽयं शूद्रेभ्योऽपि सुलभप्रायोऽभूत्। अत एव यज्ञसम्प्रदायेषु अथर्ववेदस्य महत्त्वं गौणमभवत्। [41] एवं प्रतीयते यत् पुरा अथर्वसंग्रहो बभूव पश्चाच्च आंगिरसस्तं विस्तृतमकरोत्। शान्तिपुष्टिकर्माणि अभिचारकर्माण्यपि च विभिन्नस्रोतसां विषयाः सन्ति, अत अथर्ववेदस्य प्रवाहे अनेकानि परिवर्तनानि सम्भाव्यन्ते, नात्र कोऽपि सन्देहः। [42]

पाश्चात्यविद्वत्परम्परायाम् प्रचलितमिदं यत्–पुरा ऋक्, यजुः, साम इति वेदाः एव आर्याणां मूलधर्मग्रन्थाः आसन्। अथर्ववेदस्य निर्माणम् अत्यन्तम् अर्वाचीनम्। अथर्ववेदस्य कंचिदंशम् त्यक्त्वा अवशिष्टांशस्य आर्याणाम् धर्मेषु यज्ञीयविधिषु परम्परासु च कोऽपि सम्बन्धः नासीत्। [43]

केषांचनआलोचकानां मतं यत् अथर्ववेदे पुरा 'त्रयोदश' एन काण्डानि आसन्, अवशिष्टकाण्डानि पश्चात् ग्रथितानि। पूर्ववर्तिनां त्रयोदशकाण्डेषु विषयविवेचनं क्रमरहितं सिद्धान्तरहितम् च दृश्यते। अवशिष्टसप्तकाण्डेषु विषयविभाजनं सुव्यवस्थितं दृश्यते। पाश्चात्यालोचकानां मतमिदं यत् इमे प्रसंगाः ऋग्वेदीयपरम्पराभिः सह सम्बद्धाः न दृश्यन्ते, अत एव परवर्तिनि काले एव एते ग्रथिताः प्रतीयन्ते। विटनीकृतम्–अथर्ववेदस्यानुवादभूमिकायां लैन्मन–महोदय उल्लिखति यत्–प्रारम्भिकाष्टादशकाण्डानि अथर्ववेदस्य मूलकाण्डानि सन्ति, एकोनविंशम् विंशम् च काण्डे पश्चान्निर्मिते स्तः। प्रस्तुतवन्ति तत्र युक्तिं यत्–एकोनविंशम् काण्डम् अथर्ववेदसम्बद्धं न वर्तते, विंशम् च प्रायः ऋग्वेदीयमेव विद्यते। प्रपाठककमोऽपि प्रथमकाण्डादारभ्य अष्टादशकाण्डम् यावत् विद्यते, अथर्ववेदीयप्राचीनानुक्रमणिकायामपि अष्टादशकाण्डम् यावत् एव प्राप्यते। कौशिकसूत्रेषु 19–20 तमयोः काण्डयोः विनियोगो नैव प्राप्यते। ग्रीफिथ–महोदयोऽपि अथर्ववेदस्य अनुवादं कृतवान्। तस्य कथनमिदं यत् 'अथर्ववेदः' वेदानां परिशिष्टमात्रं विद्यते। एकोनविंशम् विंशम् च काण्डे अथर्ववेदस्यापि परिशिष्टे स्तः। परवर्तिनि काले च सह ग्रथिते स्तः। अथर्ववेदप्रातिशाख्येऽपि एकोनविंश–विंश– काण्डयोः वर्णनम् न विद्यते। [44]

उपर्युक्त दिग्दर्शनेन अथर्ववेदविषये वयं किंचिदपि सनिश्चयं वक्तुम् असमर्थाः स्मः। यद्यपि भारतीयपरम्परया तु चत्वारो वेदा ईश्वरप्रदत्ताः, सहप्रकटीभूताश्च सन्ति, परं तर्कदृष्ट्या, साहित्यपरम्परया च एवं विश्वसितुम् असमर्थाः, स्पष्टप्रमाणाभावात् परम्परावशाच्च। पुनरपि अथर्ववेदस्योपोद्घाते [45] सायणाचार्येण गोपथब्राह्मणवासि उद्धरता एवं लिखितम्–

सर्वसारत्वाद् अयं वेदः श्रेष्ठः। श्रूयते हि– 'श्रेष्ठो हि वेदस्तपसोऽधिजातो ब्रह्मज्ञानां हृदये संबभूव [46]।' तथा– 'एतद् वै भूयिष्ठम् ब्रह्म यद् भृग्वङ्गिरसः। येऽङ्गिरसः स रसः येऽथर्वाणस्तद् भेषजम्। यद् भेषजम् तद् अमृतम्। यद् अमृतम् तद् ब्रह्म'। [47] 'अनन्ताः वै वेदाः' [48] परम् 'परमिता वा ऋचः परिमितानि सामानि, परिमितानि यजूंष्यथैतस्यैवान्तो नास्ति यद् ब्रह्म'। [49] एवं संक्षेपेण वैदिकसाहित्ये अथर्ववेदस्य स्थानम् महत्त्वम् च उल्लिखितम्।

**संदर्भः**


1. तेषामृग् यत्रार्थवशेन पाकव्यवस्था ।। जैमिनी सूत्र– 2.1.35
2. गीतिषु सामाख्या ।। तदेव– 2.1.36
3. शेषे यजुः ।। तदेव – 2.1.37
4. शत. ब्रा. 14.5.4.10
5. ''चत्वारो वा इमे वेदाः ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेदः।।'' गो. ब्रा. 1.2.16
6. ''तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः।।'' मुं. उ.–1.1.5
7. ''ऋग्यजुःसामथर्वाणश्चत्वारो वेदाः।।'' नृ.पू.–1.2
8. ऋग्– 10.90.9
9. अथर्व–10.7.20

10. व्यख्याय वेदत्रितयमामुष्मिकफलप्रदम्। ऐहिकामुष्मिकफलं चतुर्थं व्यचिकीर्षति।।
 –सायण। अथर्वभा. उपो. श्लोक – 10
11. ऐहिकफलानि शान्तिपौष्टिकानि कर्माणि राजकर्माणि अपरिमिततुलापुरुषादिमहादानानि च अथर्ववेदे एव प्रतिपादितानि, पौरोहित्यं च अथर्वविदैव कार्यम्। – तदेव, पृ. 7
12. यस्य राज्ञो जनपदे अथर्वाशान्तिपारगः।
 निवसत्यपि तद् राष्ट्र वर्धते निरुपद्रवम्।।–तदेव, पृ. 7
13. न तिथिर्न च नक्षत्रं न ग्रहो न च चन्द्रमाः।
 अथर्वमन्त्रसंप्राप्त्या सर्वसिद्धिर्भविष्यति।। अ. परि.–2.5.5
14. यस्तत्राथर्वणान् मन्त्रान् जपेच्छ्रद्धासमन्वितः।
 तेषामर्थोद्भवं कृत्स्नं फलं प्राप्नोति स ध्रुवम्।। अथर्वभा. उपो. पृ.–6
15. ऋग्वेदेन होत्रमेव प्रतिपाद्यते, यजुषाऽऽध्वर्यम्, साम्ना औद्गात्रम् इति वेदत्रयस्य प्रतिनियतप्रयोग प्रतिपादनपरत्वात् अवशिष्ट ब्रह्मकर्त्तव्यता प्रतिपादकश्चतुर्थो वेदो व्याख्येयः तदभावे यज्ञशरीरस्य अनिष्पत्तेरिति।। – अथर्वभा. उपो. पृ. –4
16. भेषजं वा अथर्वाणि भेषजमेव तत्करोति।। ता. महा.– 12.9.10.
17. तस्याप्सरसो विशस्ता इमा आसत युवतयः शोभना उपसमेता भवन्ति ता उपदिशत्यङ्गिरसो वेदः सोऽयमित्यङ्गिरसामेकं पर्व व्याचक्षाण इवानुद्रवेत्।। शत. ब्रा.– 13. 4. 3.8
18. सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्।। अथर्व.– 10.7.20
 अथर्वाङ्गि गरोविदं ब्रह्माणम्।। गो ब्रा– 1.2 24
19. एतत् वै भूयिष्ठं ब्रह्म यद् भृग्वंगिरसः।। गो.ब्रा. –1.3.4
 एष ह वै विद्वान्त्सर्वविद् ब्रह्मा यद् भृग्वङिगरोविद्।। गो. ब्रा. –1.2.18
20. क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते हैनं प्राणः क्षणितोः प्रक्षत्रमत्रमाप्नोति क्षत्रस्य सायुज्यं सलोकतां जयति य एवं वेद।। शत. ब्रा. – 14.8.14.4
21. भेषजं वा अथर्वाणि भेषजमेव तत्करोति।। ता. महा.– 12.9.10
22. चतुर्थं उद्धरणम् दृष्टव्यम्।
23. छन्दांसि जज्ञिरे।। ऋग्. – 10.90.9
24. ऋग्–10.71.11
25. ऋचौव होत्रं क्रियते, यजुषाऽऽध्वर्यवं, साम्नोद्गाथम्।। ऐ. ब्रा. – 5.5.8
26. अथर्वाङ्गिरोभिब्रह्मत्वम्।। गो. बा. – 1.3.2/अन्यत्रापि – अथर्वैर्वा ब्रह्मा।।
27. निरु. –1.3.7 / अध्वर्युविषये – एकविंशतितमे उद्धरणे 'ऐ. ब्रा.' प्रमाणं द्रष्टव्यम्। अन्यत्रापि श्रूयते – यजुर्वेदनाध्वर्युः।।
28. गोपथब्राह्मणेऽपि– एष ह वै विद्वांत्सर्वविद् ब्रह्मा यद् भग्वङिगरोविद्।।–
 गो. ब्रा. पूर्वभाग, 2.18
29. भेषजकृतो ह वा एष यज्ञो यत्रैवंविद् ब्रह्मा भवति।। छा. 4.17. 8
30. यज्ञस्य हैष भिषग् यद् ब्रह्मा।। ऐ. बा. 5.5.9
31. वावा च हि मनसा च यज्ञो वर्तत, इयं वै वागदो मनस्तद्वाचा त्रय्या विद्ययकं पक्षं संस्कुर्वन्ति मनसैव ब्रह्मा संस्करोति।। ऐ. ब्रा. – 5.5.8
32. अथो यद् भूयिष्ठेनैव ब्रह्मणा छन्दसां रसेनाऽर्विज्यं करोति यद् ब्रह्माः तस्माद् ब्रह्माऽर्धभाग्ध वा एष इतरेषामृत्विजामग्र आस।। ऐ. ब्रा.–5.5.9
33. स वा एष त्रिभिर्वेदैर्यज्ञस्यान्यन्तरः पक्षः संक्रियते।
 मनसैव ब्रह्मा यज्ञस्यान्यतरं पक्षं संस्करोति।। गो. ब्रा.–1.3.2
34. सारभूत ब्रह्मात्मकत्वाद् ब्रह्मकर्तव्यप्रतिपादनाच्च अयं ब्रह्मवेद इत्यप्यख्यायते।।
 – अथर्व.भा. उपो. पृ. –6
35. 5.22
36. 4.6.7.13
37. 1.5.5
38. 4.124/11.263–264/12.112
39. वैदिक साहित्य, पृ. 111 से 113 –ले. रामगोविन्द त्रिवेदी, भारतीय ज्ञानपीठ, काशी।
40. ''पुराणगत वेदविषयक सामग्री का समीक्षात्मक अध्ययन'' पृ. 89–90
 – ले. डॉ. रमाशंकर भट्टाचार्य, हिन्दी साहित्य सम्मेलन, प्रयाग।
41. तदेव, पृ. 119
42. तदेव, पृ. 187
43. ''वैदिक साहित्य विमर्श''– डॉ. कृष्णकुमार, साहित्य भण्डार, सुभाष बाजार, मेरठ, पृ. 162
44. तदेव पृ. 164–165
45. ''वैदिक साहित्य'', पृ. 114 – रामगोविन्द त्रिवेदी, भारतीय ज्ञानपीठ, काशी।
46. गो. ब्रा. – 1.1.9
47. तदेव – 1.1.9
48. तै.बा. – 3.10.11.4
49. तै.सं. – 7.3.1